# BK BIRLA CENTRE FOR EDUCATION

SARALA BIRLA GROUP OF SCHOOLS
SENIOR SECONDARY|CO-ED DAY CUM BOYS' RESIDENTIAL SCHOOL

**MID-TERM_EXAMINATION 2024-25**
**SANSKRIT (119)**

Class : X | Duration : 3 Hrs
Date : 25.09.2024 | **MARKING SCHEME** | Max. Marks : **80**
Admission No.: | Roll No.:

---

**सामान्य निर्देशाः –**

- कृपया सम्यकतया परीक्षणं कुर्वन्तु अस्मिन् प्रश्नपत्रे अष्टादश् प्रश्नाः सन्ति।
- उत्तर लेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यमेव लेखनीयः।
- प्रश्नस्य क्रमांकः प्रश्नपत्रानुसारम् एव लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि निर्देशानुसारं लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन पठनीयाः।

---

**(खण्ड क)**

**अपठितावबोधनम् (10 अंकात्मकः)**

**प्रश्न 01 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×4=2 अंकौ)**

(1) प्रतिदिनं कः न्यूनः भवेत् ? **स्वार्थः**
(2) प्रतिदिनं कः अधिकाधिकः भवेत् ? **परार्थः**
(3) वयं कस्मै सर्वस्वम् अर्पयाम ? **समाजाय**
(4) इतः अपि कः सुन्दरतरं भवेत् ? **जगतः**

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(2×2=4 अंकाः)**

(1) जीवनस्य सार्थकता कस्याः उक्तेः अनुसारं जीवने अस्ति ?
**उत्तरम् –'स्वस्मै स्वल्पम् समाजाय सर्वस्वम्' इति उक्तेः अनुसारं जीवने एव जीवनस्य सार्थकता अस्ति।**
(2) कस्य विषये चिन्ता न करणीया ?
**उत्तरम् –अस्माकं जीवने यः समयः अतीतः स तु गतः, अतः तस्य विषये चिन्ता न करणीया।**

**(स)** अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृते लिखत। **(1×1=1 अंकः)**
**उत्तरम् –परोपकाराय जीवनम्**

**(द) यथानिर्देशं उत्तरत – भाषा संबन्धी कार्य** (केवलं प्रश्नत्रयम्) **(1×1=3 अंकाः)**

(1) 'शेषम्' इति पदस्य किं समानार्थकं पदं अत्र प्रयुक्तम् ? **(ख) अवशिष्टम्**
(2) 'अवशिष्टम्' इति पदं कस्य पदस्य विशेषणम् ? **(क) जीवनं**
(3) तस्य विषये चिन्ता न करणीया। इत्यत्र तस्य कस्य कृते प्रयुक्तम् ? **(घ) समयस्य**
(4) अस्मिन्नेव सुखस्य रहस्यम् अस्ति। वाक्येसिमन् कः अव्ययः प्रयुक्तः ? **(घ) एव**

**(खण्ड ख)**

**रचनात्मककार्यम् (15 अंकात्मकः)**

**प्रश्न 02 भवान्/भवती सौम्य/सौम्या स्वविद्यालयस्य वर्णनं कुर्वन् मित्राय लिखिते पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत –** **(1/2×10=5 अंकाः)**

भवान्/भवती सौम्य/सौम्या हैं। अपने विद्यालय का वर्णन करते हुए मित्र को लिखे पत्र को कोष्ठक में दिए पदों की सहायता से रिक्तस्थान भरकर उत्तरपुस्तिका में पुनः लिखिए–

परीक्षाभवनम्
दिनांकः –––

प्रिय मित्र (1) **संजीवः**
(2) **सस्नेहं** –––––––– नमस्कारः।

अहं कुशलः अस्मि, भवतः (3) **कुशलतायाः** कामनां करोमि। भवतः पत्रं प्राप्तम्। भवान् पत्रे मम विद्यालयस्य वर्णनं इष्टवान्, अतः पत्रेस्मिन् अहं (4) **स्वविद्यालयस्य** वर्णनं लिखन् अस्मि। भवान् मम विद्यालयस्य वर्णनं ज्ञात्वा (5) **प्रसन्नो** भविष्यति।

मम (6) **विद्यालयः** विशालः विस्तृतः सुन्दरः च अस्ति। अत्र (7) **पंचशत्** छात्राः सन्ति। विद्यालये अनेके वृक्षाः सन्ति। सर्वत हरितमयं वातावरणम् अस्ति । विद्यालये द्वितीया कक्षादारभ्य (8) **द्वादशी** कक्षां यावत् अध्ययनं भवति। त्रिचत्वारिंशत् कक्षाः सन्ति। (9) **विशालः** पुस्तकालयः अपि अस्ति। पंच छात्रावासाः सन्ति। छात्रासेषु त्रिशताधिकाः छात्राः निवसन्ति। विशालः भोजनालयः अपि अस्ति। सुमधुरं भोजनम् अल्पाहारादिकं ततः लभते। बोर्डकक्षासु उत्तमः परिणामः आगच्छति। भवान् एकदा विद्यालयम् आगत्य भ्रमतु सर्वं ज्ञास्यति। मातापित्रोः प्रणामाः।

(10) **दीपावल्याः** अवकाशे मिलामः।

भवतः अभिन्न मित्रम्

सौम्य / सौम्या

**प्रश्न 03 'विद्यालये वृक्षाणां संरक्षणम्' इति विषयम् अधिकृत्य मंजूषातः शब्दान् चित्वा संस्कृतभाषया पंचवाक्यानि रचयत– (5 अंकाः)**

विद्यालय में वृक्षों का संरक्षण इस विषय पर कोष्ठक से शब्द चुनकर संस्कृतभाषा में पाँच वाक्य लिखिए–

1, वृक्षाः परोपकारकाः भवन्ति।

2, छात्राः वाटिकायां पादपान जलेन सिंचन्ति।,

3, पर्यावरणस्य हानिः न कुर्यात्। वृक्षाः आतपं सहन्ति।

4, पथिकेभ्यः संरक्षणम् प्राणवायुं च यच्छन्ति।

5, वृक्षारोपणम् संरक्षणम् च अस्माकं धर्मः।

7, वृक्षारोपणम् कृत्वा विद्यालयस्य सुंदरताम् वर्धयेत्।

**छात्रैः रचितानि अन्यशुद्धानि वाक्यानि स्वीकरणीयानि।**

**अथवा**

**चित्रं दृष्ट्वा मंजूषायाः सहायतया पंचवाक्यानि लिखत –**

चित्र को देखकर मंजूषा की सहायता से पाँच वाक्य लिखिए –

**(1)** चित्रम् नदीतटस्य वर्तते।

**(2)** नदीतटे गृहं अस्ति।

**(3)** नदीम् उभयतः वृक्षाः सन्ति।

**(4)** हरितमयं वातावरणं शान्तं वर्तते।

**(5)** नद्याम् पक्षिणौ क्रीडन्ति।

**(6)** आकाशे पक्षिणः विहरन्ति।

**(7)** नद्याम् सुंदरं स्वच्छं जलं शिलाखंडाः च सन्ति।

**छात्रैः रचितानि अन्यशुद्धानि वाक्यानि स्वीकरणीयानि।**

**प्रश्न 04 मंजूषायां दत्तैः शब्दैः कथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत – (1/2×10=5 अंकाः)**

मंजूषा में दिए शब्दों के द्वारा कथा को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

एकदा एका**(1) पंचवर्षीया** बालिका पित्रा सह मेलां दृष्टुं **(2) नगरं** प्रति गच्छति स्म। सा चतुरमतिः **(3) धैर्यशालिनी** च आसीत्। सा बाल्यकाले एव विविधासु **(4) विद्यासु** परांगता आसीत्। मार्गे एका **(5) नदी** आसीत् सा नदीं **(6) नौकया** गच्छति स्म। नौकायाम् अनेके जनाः आसन्। नद्यां एकः मकरः दृष्टः। मकरं दृष्ट्वा मकरात् भीतौ द्वौ जनौ जले पतितौ। तयोः मुखे भयस्य छाया आसीत्। सा अपि भीता आसीत् परन्तु अचिन्तयत् – तयोः **(7) रक्षणं** करणीयम् ? सा जले अकूर्दत्। तयोः **(8) जनयोः** हस्तौ गृहीत्वा नौकां प्रति च अनयत्।सा तयोः **(9) रक्षणमकरोत्।**

सा साहसी बालिका **(10) लक्ष्मीबाई** आसीत्। एतस्यै वीरबालिकायै नमः।

अथवा

**मंजूषातः उचितानि पदानि चित्वा संवादं प्रपूर्य उत्तरपुस्तिकायां पुनः लिखत –**

मंजूषा से उचित शब्द को चुनकर संवाद को पूर्ण करके उत्तर पुस्तिका में पुनः लिखिए –

सुखदा – सखि! किं जानासि अद्य कः उत्सवः अस्ति ?

नमिता – अद्य **(1) दीपावली** अस्ति।

सुखदा – तदा तु अद्य वयं **(2) नवीनानि** वस्त्राणि धारयिष्यामः।

नमिता – मम माता अपि नवीनां **(3) शाटिकाम्** धारयिष्यति।

सुखदा – अहं पित्रा सह हट्टं **(4) गत्वा** क्रीडनकानि मिष्ठान्नं च क्रेष्यामि।

नमिता – त्वं मिष्ठान्नं क्रीत्वा किं करिष्यसि ?

सुखदा – वयं मिष्ठान्नं परिवाराय **(5) बान्धवेभ्यः** दास्यामः।

नमिता – किं मित्रेभ्यः किंचिदपि न दास्यसि ?

सुखदा – किमर्थं न वयं मित्रेभ्यः अपि मिष्ठान्नं **(6) वितरिष्यामः।**

नमिता – रात्रौ वयं सर्वे बालकाः मित्राणि च मिलित्वा **(7) विस्फोटकपदार्थान्** चालयिष्यामः।

सुखदा – अहं तु विस्फोटकपदार्थानां **(8) बहिष्कारम्** करिष्यामि।

नमिता – किमर्थम्

सुखदा – यत् तेषां **(9) धूम्रेण** ध्वनिना च प्रदूषणं प्रसरति।

नमिता – समीचीनं कथितम्। अहं रात्रौ **(10) लक्ष्मीपूजनम्** तु करिष्यामि परं विस्फोटकपदार्थान् न चालयिष्यामि।

## (खण्ड ग)

## अनुप्रयुक्तव्याकरणम् (25 अंकात्मकः)

**प्रश्न 05 सन्धिं सन्धिविच्छेदं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत –(प्रश्नचतुष्टयं)(1×4=4 अंकाः)**

सन्धि और सन्धिविच्छेद करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।(4 प्रश्न)

(1) मंदं–मंदं (पवनं) **पो + अनं** वहति।

(2) छात्रः अध्ययनेन (वाक्+ईशः) **वागीशः** भवति।

(3) त्वम् (इन्द्रियाण्यादौ) **इन्द्रियाणि + आदौ** नियम्य।

(4) (तत्+शरेण) **तच्छरेण** हरिणः मृतः।

(5) (सत्+चरित्रम्) **सच्चरित्रम्** पूज्यनीयं भवति।

**प्रश्न 06 समासं विग्रहं वा कृत्वा रिक्तस्थानानि प्रपूर्य वाक्यानि लिखत – (1×4=4 अंकाः)**

समास/विग्रह करते हुए रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए –

(1) **(शरणम् आगतं)** ––––––– सर्वदा रक्षणीयम्। **(क)** शरणागतं

(2) **(चन्द्रमुखम्)** –––––– शोभते ईश्वरः। **(ग)** चन्द्र इव मुखम्

(3) **(चतुर्मुखः)** –––––– वेदानां रचनाम् अकरोत्। **(ग)** चतुराणि मुखानि यस्य सः(ब्रह्मा)

(4) **(अष्टानाम् अध्यायानाम् समाहारः)** ––––– अस्ति। **(ख)** अष्टाध्यायी

**प्रश्न 07 प्रकृति प्रत्ययं योजयित्वा उचितम् उत्तरं चिनुत – (प्रश्नचतुष्टयम्) (1×4=4 अंकाः)**

प्रत्यय और मूल शब्दों को जोड़कर उचित उत्तर चुनकर लिखिए (कोई चार)

(1) छात्रः वचनं **(श्रृ+क्त्वा) ––––––** आज्ञां पालयति। **(ग)** श्रुत्वा

(2) बालकः उपहारं **(दा+तुमुन्) ––––––** मित्रं मिलति। **(ख)** दातुम्

(3) प्रमोदः कार्यं **(कृ+शानच्) ––––––** प्रसन्नः भवति। **(ख)** क्रियमाणः

(4) छात्रेण पाठं **(पठ्+क्त्) ––––––।** **(क)** पठितः

(5) माता पुत्रस्य वेदनां **(ज्ञा+क्तवतु) ––––––** । **(घ)** ज्ञातवती

(6) माता भेजनं **(पच्+शतृ) ––––––** वार्तालापं करोति। **(ग)** पचन्ती

**प्रश्न 08 निर्देशानुसारं वाच्य परिवर्तनम् कृत्वा उत्तरपुस्तिकायां लिखत –(प्रश्नत्रयम्) (1×3=3 अंकाः)**

निर्देश के अनुसार वाक्य परिवर्तन करके उत्तरपुस्तिका में लिखिए। (तीन प्रश्न)

(1) सः रोटिकां खादति। (कर्मवाच्ये) **तेन रोटिका खाद्यते।**
(2) गायकेन गीतं गीयते। (कर्तृवाच्ये) **गायकः गीतं गायति।**
(3) छात्रेण ग्रन्थः पठ्यते। (कर्तृवाच्ये) **छात्रः ग्रन्थं पठति।**
(4) शकुन्तला राजभवनम् गच्छति। (कर्मवाच्ये) **शकुन्तलया राजभवनं गम्यते।**

**प्रश्न 09 कोष्ठके दत्तं समयं संस्कृतेन विलिख्य वाक्य उत्तरपुस्तिकायां लिखत –(प्रश्नत्रयम्)(1×3=3अंकाः)**
कोष्टक में दिए समय को संस्कृत में लिखकर वाक्यों को उत्तरपुस्तिका में लिखिए।(तीन प्रश्न)
(1) महिमा विद्यालयात् (2:15) **सपादद्वि**वादने आगच्छति।
(2) सा (2:20) **विंशत्याधिकद्वि**वादने भोजनं करोति।
(3) तया (3:45) **पदोनत्रि**वादनेविश्रामः क्रियते।
(4) सा (4:05) **पंचाधिकचतुर**वादनतः 4:50 वादनपर्यन्तं गृहकार्यं करोति।

**प्रश्न 10 मंजूषायां दत्तैः उचितैः अव्ययपदैः रिक्त स्थानानि पूरयित्वा वाक्यानि लिखत – (1×4=4 अंकाः)**
कोष्टक में दिए उचित अव्ययपदों से रिक्तस्थानों को भरकर वाक्यों को पूरा करके लिखिए।
(1) अहं त्वाम् **भूयोभूयः** नमामि।
(2) पुस्केभ्यो **नमः**।
(3) वृथा कलहं **मा** कुरू।
(4) अहं **सम्प्रति** गृहं गन्तुमिच्छामि।

**प्रश्न 11 रेखांकितपदायै शुद्धं पदं चित्वा अशुद्धिशोधनं कृरुत – (प्रश्नत्रयं) (1×3=3 अंकाः)**
उचितपद चुनकर वाक्य शुद्ध कीजिए। (कोई तीन)
(1) छात्रेण पाठाः <u>**पठति**</u>। **(ग)** पठ्यन्ते
(2) <u>**शुद्धम्**</u> पवनः वहति। **(क)** शुद्धः
(3) <u>**पठ्यमाना**</u> छात्रः चिन्तयति। **(ख)** पठ्यमानः
(4) **अस्य** बालिकायाः माता सम्माननीया महिला अस्ति। **(ग)** अस्याः

**(खण्ड घ)**

**पठितावबोधनम् (30 अंकात्मकः)**

**प्रश्न 12 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे गद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**
(1) राज्ञः काम् आकर्ण्य जनाः तं देशं आयान्ति स्म ? **दानशीलताम्**
(2) शिवीनां राजा अभवत् ? **शिवीनां**
(3) भगवान् बोधिसत्व कैः राजा अभवत् ? **बहुजन्मार्जितपुण्यफलैः**

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**
(1) राजा बाल्यकालाद् एव कथम् आसीत ?
उत्तरम् – **बाल्यकालाद् एव वृद्धोपसेवी विनयशीलः शास्त्रपरांगतः च आसीत।**
(2) अर्थिनां समूहः कानि प्राप्य सन्तुष्टः अभवत ?
उत्तरम् – **अर्थिनां समूहः अन्न–पान–वसन–रजत–स्वर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्**
(3) राजा कथं प्रजाः पालयति स्म ?
उत्तरम् – **जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।**

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**
(1) <u>देशान्तरेभ्योपि</u> आयान्ति स्म। रेखांकितपदस्य विग्रहः किम् ?**(ख) देशान्तरेभ्यः+अपि**
(2) 'पापम्' इत्यस्य किं विलोमपदं गद्यांशे प्रयुक्तम् – **(ख) पुण्यम्**

**प्रश्न 13 अधोलिखितं पद्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे पद्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**(अ) एकपदेन उत्तरत –** (केवलमेकंप्रश्नम्) **(1×1=1 अंकः)**

(1) कामात् कः अभिजायते ? **क्रोधः**
(2) कान् ध्यायतः सङ्गः उपजायते ? **विषयान्**

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**
(1) सङ्गः कथं उपजायते ? **सङ्गः विषयान् ध्यायतः उपजायते।**
(2) कामः कस्मात् जायते ? **कामः सङ्गात् जायते।**

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकौ)**
(1) तेषूपजायते। वाक्येस्मिन् का संधिः अस्ति ? **(क)** दीर्घ
(2) उत्पन्नः भवति इत्यर्थे किं पदं श्लोके प्रयुक्तम् ? **(घ)** सर्वे

**प्रश्न 14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्त प्रश्नानामुत्तराणि संस्कृतेन लिखत –**
(नीचे लिखे नाट्यांश को पढ़कर दिए प्रश्नों के उत्तर संस्कृत में लिखिए।)

**(अ) एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1/2×2=1 अंकः)**
(1) कैः शब्दैः वातावरणं आकुलीक्रियते ? **'का का' शब्दैः**
(2) कस्य कर्म अपि कृष्णम् वर्तते ? **काकस्य**
(3) कः सर्वमेव भक्षयति ? **काकः**

**(ब) पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) **(1×2=2 अंकौ)**
(1) काकः कर्त्तव्यपरायणविषये किम् उक्तवान् ?
**उत्तरम् – अहं तु अतीव कर्त्तव्यपरायणः। प्रभाते का का ध्वनिना सुप्तान् प्रबोधयामि, कर्मसु च नियोजयामि।**
(2) सरस्तीरे कः विहरति ?
**उत्तरम् – सरस्तीरे राजहंसः विहरति।**
(3) राजहंस्याः अनुसारं काकः किम् अन्यत् न करोति ?
**उत्तरम् – स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोति ?**

**(स) यथानिर्देशं उत्तरत –** **(1×2=2 अंकाः)**
(1) कर्मसु च नियोजयामि। वाक्येस्मिन् क्रियापदं किम् ? **(घ)** नियोजयामि
(2) अहं तु अतीव कर्त्तव्यपरायणः। वाक्येस्मिन् अव्ययपदं किम् ? **(ख)** अतीव

**प्रश्न 15 रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत – (पंच प्रश्नाः)** **(1×5=5 अंकाः)**
(रेखांकित शब्दों के आधार पर प्रश्ननिर्माण कीजिए) (कोई पाँच)

**(क)** <u>**मनसः**</u> निग्रहः वायोः इव कठिनः। **कस्य**
**(ख)** <u>**विषयाणाम्**</u> उपभोगेन् आसक्तिः वर्धते। **केषाम्**
**(ग)** अवधीरिताः <u>**अस्माभिः**</u> गुरुजनोपदेशाः। **कैः**
**(घ)** बकः मीनान् छलेन् अधिगृह्य <u>**क्रूरतया**</u> भक्षयति। **कया**
**(ङ)** <u>**दानशालासु**</u> विचरन् राजा अचिन्तयत्। **कासु**
**(च)** <u>**भारत्याः**</u> कोशः अपूर्वः। **कस्याः**

**प्रश्न 16 प्रदत्तस्य श्लोकस्य अन्वयं प्रपूर्य लिखत –** **(2 अंकौ)**
(दिए श्लोक के अन्वय में रिक्तस्थान भरकर उत्तर पुस्तिका में लिखिए)
**अन्वयः–** शिष्यः **आचार्यात्** पादम् आदत्ते। शिष्यः **स्वमेधया** पादं आदत्ते।
कालेन् पादं **आदत्ते**। शिष्यः **सब्रह्मचारिभिः** पादम् **आदत्ते**।

**प्रश्न 17 प्रसंगानुसारम् उचितम् अर्थं चित्वा लिखत –** **(1×4=4 अंकाः)**
प्रसंग के अनुसार उचित अर्थ वाले उत्तर चुनकर लिखिए–
**(1)** चंचलम् हि मनः कृष्ण! <u>**प्रमाथि**</u> बलवद्दृएम्। **(क) मथनशीलं**
**(2)** स्वध्यायाभ्यसनं चैव <u>**वाङ्मयं**</u> तपः उच्यते। **(ग) साहित्यम्**
**(3)** <u>**सकलं**</u> ब्रह्माण्डं व्याकुलं संजातम्। **(ग) सम्पूर्णम्**
**(4)** **मेध्यम्** अमेध्यं सर्वं भक्षयति। **(ग) विशुद्धम्**

**प्रश्न 18 घटनाक्रमानुसारं वाक्यानि पुस्तिकायां लिखत –** **(4 अंकौ)**

(घटना को क्रम के अनुसार उत्तर पुस्तिका में लिखिए)

**(ग)** भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

**(छ)** राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।

**(क)** सुपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपतिः वानरान् राजभवनं त्यक्तुम् अकथयत्।

**(ज)** रसनास्वादलुब्धाः मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुम् न स्वीकृतवन्तः।

**(च)** अन्यस्मिन् अहनि स मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

**(घ)** ज्वलन् स मेषः अश्वशालां प्रविष्टः। परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन्।

**(ख)** राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

**(ङ)** भयत्रस्ता कपयः गुरुजनोपदेशस्य अवधीरणातः पश्चातापं कृतवन्तः।

—————————————————————— इत्यलम् ——————————————————————